International Journal of Sanskrit Research 2021; 7(5): 267-270

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 267-270
© 2021 IJSR
www.anantaajournal.com
Received: 25-07-2021
Accepted: 20-08-2021

**डॉ. शिवसाधनदेवनाथः**
अतिथिः शिक्षकः
माइकेलमधुसूधनदत्तमहाविद्यालयः, सब्रुमः, दक्षिण-त्रिपुरा, भारत

**Corresponding Author:**
**डॉ. शिवसाधनदेवनाथः**
अतिथिः शिक्षकः
माइकेलमधुसूधनदत्तमहाविद्यालयः, सब्रुमः, दक्षिण-त्रिपुरा, भारत

# शुक्लयजुर्वेददृष्ट्या भगवतो रुद्रदेवस्य प्रभाव:।

## डॉ. शिवसाधनदेवनाथः

**प्रस्तावना**

रुद्रदेवस्य नामकरणविषये नाना मतवादा: प्रचलिता: सन्ति। आचार्यसायणेन ऋक्संहिताया: 'कद्रुद्राय' इति मन्त्रस्य भाष्यस्य व्याख्याकाले 'रुद्' धातुतो रुद्रशब्दस्य निर्वचनं कृतम् । यस्यार्थो रोदनम्। तदुदितञ्च –"रोदयतिसर्वमन्तकाले इतिरुद्र:।"[1] अर्थात् य सर्वदा रोदनं करोति स एव रुद्र:। अथर्ववेदस्य ७.९१.१ इति मन्त्रस्य भाष्ये सायणेन उक्तम् –"रोदयति शत्रुन् इति रुद्र:।"[2] अर्थात् य शत्रुन् रोदनं कारयति स एव रुद्र:।

ऋग्वेदस्य 'इमारुद्राय' इति मन्त्रस्य भाष्ये सायणाचार्य: कथयति य: संसारनामकं दु:खम् अपसरणं कृत्वा विनाशं करोति स रुद्र: - "रुत्संसाराख्यंदु:खंतत्द्रावयति अपगमयति विनाशयतीतिरुद्र:।"[3] पुन: अस्मिन् भाष्ये एव 'रुद्र' इति शब्दम् आत्मविद्यार्थे प्रयोगं कृतम्। उक्तञ्च - "रुत्शब्दात्मिकावाणीतत्प्रतिपाद्यात्मविद्यावा तामुपासकेभ्योरातिददातीतिरुद्र:।"[4] पुनश्च भाष्येऽस्मिन् रुद्रं अन्धकारविदारणकारी देवतारूपेण आलोचनं कृतम् - " रुणद्धिआवृणोतीतिरुत् अन्धकारादि तंदृणातिविदारयतीतिरुद्र:।"[5]

सायणाचार्येण 'इमारुद्राय' इति ऋग्वेदीयमन्त्रस्य भाष्ये एकस्य आखानस्य उल्लेखं कृतम्। तेन आखानानुसारेण यो रोदनं कारयति स एव रुद्र:। अपि वा य: स्वयमेव क्रन्दनं करोति स एव रुद्र: । तदाख्यानं यथा – "कदाचिद्देवासुरसंग्रामे अग्न्यात्मकोरुद्र: देवैर्निक्षिप्तंधनमपहृत्यनिरगात् असुरान्जित्वादेवाएनमन्विदृष्ट्वाधनमहरन् तदानीमरुद्रत् तस्माद्रुद्रइत्याख्यायते।"[6]

रुद्रदेवं शुक्लयजुर्वेदे महाशब्दकारीरूपेण स्तुतिं कृतम्। तद् ब्रूतञ्च – 'उच्चैर्घोष' [7] इति। पुन: अस्यां संहितायामेव रुद्रं श्रवप्रतिश्रवश्च इति शब्दद्वयेन उपासनां क्रियते। यस्य श्ब्दद्वयस्यार्थ: शब्द: प्रतिशब्दश्च। उक्तञ्च – "श्रवाय च प्रतिश्रवाय च।"[8] महिधराचार्य: शुक्लयजुर्वेदस्य 'नमस्ते' इति मन्त्रस्य भाष्ये रुद्रशब्दस्य व्याख्यां अकुरुत –"रुत् दु:खं द्रावयति रुद्र:। यद्वा 'रु गतौ' ये गत्यर्थास्ते ज्ञानार्था:। रवणं रुत् ज्ञानं राति ददाति रुद्र: ज्ञानं भावे क्विप् तुगागम:। रुत् ज्ञानप्रद:। यद्वा पापिनो नरान् दु:खभोगेन रोदयति रुद्र:।"[9]

निरुक्तकारस्य मतानुसारेण देवतानां निवासेभ्य: मुख्यलोकत्रयमस्ति। तद यथा – पृथिवीलोक:, अन्तरिक्षलोको मध्यमलोको वा, द्युस्थानश्च। अग्नि:, वायु:, सूर्यश्च इति प्रधानत्रयदेवता क्रमेण निवसन्ति। [10] यद्यपि देवता: तिस्त्र:, परन्तु कर्मानुसारेण देवता: बहव: सन्ति – " बहूनि नामधेयानि भवन्ति।" [11]

यास्कमहोदयेन वायुरादिभि: देवताभि: सह रुद्रदेवं मध्यमस्थाने स्थापितम्। [12] परन्तु पृथिवीलोके द्युलोके च विचरनं कुरुते स रुद्रदेव:। तद् ब्रतश्च - "या ते विद्युदवसृष्टा दिवस्परि-दिवोधि, विद्युद्-द्युतेर्वा द्योततेर्वा । क्ष्मया चरति क्ष्मा पृथिवी तस्यां चरति।" [13]

वाजसनेयिसंहितायां रुद्रदेवस्य कर्माधिकारो लोकत्रयेषु परिलक्षते। उक्तश्च – "नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषव:।"[14] मन्त्रेऽस्मिन् रुद्रदेवं द्युलोकनिवासीरूपेण अर्चना कृता। पुन: अन्तरिक्षलोकस्य देवतरूपेण उपासनं क्रियते। तदुदितम् - नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषव:।" [15] पुनश्च पृथिवीलोकस्य देवतारूपेनापि रुद्रदेवस्य स्तुति दृश्यते - "नमोऽस्तु रुद्रेभ्यो ये पृथिभ्यां येषामन्नमिषव:।" [16]

भगवतो रुद्रस्य सर्वाधिक: प्रभाव: परिलक्षते शुक्लयजुर्वेदस्य षोडशोऽध्याये। तत्र सर्वेषां भूतानां प्रथम: पूजनीयो देवो रुद्र: - "अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक:।"[17] विषयेऽस्मिन् महीधराचार्येण अस्य मन्त्रस्य भाष्ये ब्रुतम् – "प्रथम: सर्वेषां मुख्य: पूज्यत्वात्।"[18] स रुद्रदेव: शत्रून् वाणं निक्षेप्तुं हस्ते वाणं धारणं करोति। तदुदितश्च –

"यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे।"[19]

सोऽयं रुद्रदेव: तस्य धनुषरूपेण अस्त्रेण सर्वान् शान्तिरूपेण परिपालनं कुर्वण:। तद् ब्रुतश्च –

"या ते हेतिर्मीढुष्टम हस्ते वभूव ते धनु:।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज।।"[20]

भगवता रुद्रेण पापीजनानां कृते कुत्सितगतिप्रदानं क्रियते। अस्मिन् विषये भाष्यकारेण महीधराचार्येण प्रोक्तम् – " द्रापयति कुत्सितां गतिं पापिन: प्रापयतीति द्रापि:।"[21] जटाधारी रुद्रदेवो द्विपदयुक्तानां प्राणीगणानां, चतुष्पदयुक्तानां प्राणीगणानाञ्च स्वस्थं करोति। अपि च स रुद्रदेव: सर्वं प्राणीजातं समृद्धं करोति। तद् ब्रुतश्च –

"इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मती:।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्नातुरम।।"[22]

भगवतो रुद्रदेवस्य शान्तकल्याणकारीशरीरं वलञ्च संसारव्याधि: देहव्यधिश्च निवारणस्य औषधिरूपेण जनानां स्वस्थं सुखदानञ्च करोति। तदुक्तञ्च –

"या ते रुद्र शिवा तनू: शिवा विश्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे।।"[23]

आचार्यमहीधरेण अस्य मन्त्रस्य भाष्ये रुद्रदेवस्य शान्तस्य कल्याणकारीरूपस्य चोल्लेखं कृतम् – "हे रुद्र! या ते तव ईदृशी तनू: शरीरं तया तन्वा नोऽस्मान् जीवसे जीवितुं मृड सुखय। कीदृशी शिवा शान्ता अघोरा। सर्वेस्वह:सु सर्वदा शिवा कल्याणकारणी भेषजा औषधरूपा संसारव्याधिनिवर्तिका। रुतस्य शरीरव्याधे: शिवा समीचीना भेषजी निवर्तकौषधि:।"[24]

भगवता रुद्रेण साधारणजनानां कृते हेतिरायुधं वर्जनं क्रियते। तस्य रुद्रदेवस्य क्रोधतो जातो द्रोहबुद्धि: अपि परित्यागं करोति। तेन रुद्रदेवेन यजमानानां भयनिवृत्तये स्थिराणि धनुंषि ज्यारोहितानि क्रितानि। एवञ्च तस्य रुद्रदेवस्य प्रभावेन पुत्रा: पौत्रगणाश्च सुखलाभं करोति। तदुदितञ्च –

"परि नो रुद्रस्य हेतिवृणक्तु परि त्वेषस्य दुर्मतिरघायो:।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड।।"[25]

भगवान् रुद्रदेव: श्रेष्ठकल्याणं सम्पादयति, तस्मिन् कारणे स रुद्रदेव: अत्यन्त: शिवतम:, शान्त:, सुमनाश्च - "मीढुष्टम शिवतम शिवो न: सुमना भव। "[26] आचार्यमहीधरेण विषयेऽस्मिनुदितम् - "हे शिवतम अत्यन्तं कल्याणकर्ता:, नोऽस्मान् प्रति शिव: शान्त: सुमना: हृष्टचित्तश्च भव।"[27]

अयं रुद्रदेवो विविधं किरिं घातादि उपद्रवं विनाशं करोति। तस्य रुद्रदेवस्य सहस्त्राणि आयुधानि साधारणजनानां परित्यज्य शत्रूण् विनाशयन्ति। तद् ब्रूतश्च -

"विकिरिद्र विलोहित नमस्ते अस्तु भगवः।
यास्ते सहस्त्रं हेतयोऽन्तमस्मन्निवपन्तु ताः।।"[28]

भगवतो रुद्रदेवस्य ये खलु सहस्त्राणि आयुधानि सन्ति ताषाम् आयुधानां तीक्ष्णमुखानि साधारणजनानां परित्यज्य अन्ये दृशि स्थापनं क्रियते तेन रुद्रदेवेन। तद् प्रोक्तम् –

"सहस्त्राणि सहस्त्रशो वाह्वोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि।।"[29]

भगवता रुद्रदेवस्य प्रभावेन अन्नेषु स्थिराः पात्रस्थक्षीरादिपानीयाश्च धातुवैषम्यं सञ्जायते - "येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्। "[30] यथोक्तं महीधराचार्येण अस्य मन्त्रस्य भाष्ये - "ये रुद्रा अन्नेषु भुज्यमानेषु स्थिराः सन्तो जनान् विविध्यन्ति विशेषेण ताडयन्ति। धातुवैषम्यं कृत्वा रोगानुत्पादयन्तीत्यर्थः। तथा पात्रेषु पात्रस्थक्षीरोदकादिषु स्थिराः सन्तः पिबतः क्षीरादिपानं कुर्वतो जनान् विविध्यन्ति"[31] इति।

भगवतो रुद्रदेवस्य बहूनि अस्त्राणि सन्ति। तेषु अस्त्रेषु एकम् अस्त्रं भवति वृष्टिः। अतः अतिवृष्टिरपि रुद्रस्याधीनः। अतिवृष्टिः निक्षिप्य प्राणिगणानाम् उपद्रवम् उपस्थितं क्रियते तेन रुद्रेण। उक्तञ्च – "नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमषिवः।"[32] आचार्यमहीधरेणापि उदितम् - "रुद्राणां वर्षं वृष्टिरेव इषवः वाणाः। आयुधस्थानीया वृष्टिः। अतिवृष्ट्यादीतिभिः प्राणिनो घ्नन्ति तेभ्यो रुद्रेभ्यो नमो नमस्कारोऽस्तु।"[33]

भगवतो रुद्रदेवस्य अपरम् एकम् अस्त्रं भवति वातः अर्थात् वायुः। तेन वायुरूपास्त्रेण स रुद्रदेवः विश्वस्मिन् उपद्रवसृष्टिं करोति। तद् ब्रुतञ्च - "नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषांवातइषवः। "[34] अन्नम् अपरम् एकम् अस्त्रं भवति भगवतो रुद्रदेवस्य । तेन भगवता रुद्रदेवेन अन्नरूपास्त्रेण प्राणीषूपद्रवं सृष्टिं क्रियते। तद् प्रोक्तम् - "नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः।"[35]

भगवतो रुद्रदेवस्य प्रभावः शुक्लयजुर्वेदस्य षोडशोऽध्यायमृते अपि तृतीयोऽध्याये परिलक्षते। अत्र भगवता रुद्रदेवेन जनानां कृते व्यवसायादीनि सर्वप्रकारश्रेयकार्यानि कृतानि। यथोक्तं शुक्लयजुर्वेदीयश्रुतौ - "यथा नः श्रेयसस्करद् यथा नो व्यवसाययात्। "[36] विषयेऽस्मिन् महीधराचार्यो प्रोक्तवान् - "यथा च नोऽस्मान् श्रेयसः करत् ज्ञातिषु प्रशस्यतरान् कुर्यात्। यथा च अस्मान् व्यवसाययात् सर्वेषु कार्येषु निश्चययुक्तान् कुर्यात् तथैनं जपाम इत्यर्थः।"[37]

सोऽयं रुद्रदेवो न केवलं जनानाम् उपकारसाधनं करोति । अपि तु गृहपशूनां कल्याणसाधनं क्रियते भगवता रुद्रदेवेन। उक्तञ्च –

"भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्।
सुखं मेषाय मेष्यै।।"[38]

अर्थात् अयं रुद्रदेवः सर्वप्रकारकः उपद्रवनिवारकः औषधिस्वरूपः। गवे अश्वाय पुरुषाय च भेषजस्वरूपः स रुद्रदेवः। एवञ्च भगवान् रुद्रदेवो मेषानपि सुखप्रदानं करोति। अस्मिन् विषये भाष्यकारेण महीधराचार्येण ब्रुतम् – "हे रुद्र! त्वं भेषजमसि औषधवत् सर्वोपद्रवनिवारकोऽपि। अतोऽस्मदीयेभ्यो गवे अश्वाय पुरुषाय च भैषज्यं सर्वव्याधिनिवारकमौषधं देहि। मेषाय मेष्यै च सुखं देहि।"[39]

**निष्कर्षः**

अतो निष्कर्षरूपेण कथयितुं शक्यते अस्मिन् निखिले जगति भगवान् रुद्रदेवो हि परब्रह्मस्वरूपः। रुद्रदेवः एव सृजनकर्ता। सोऽयं रुद्रदेवो हि पालको रक्षकः संहारकश्च। तं भगवन्तं रुद्रदेवं विहाय कोऽपि नास्ति सर्वश्रेष्ठः। अस्य जगतः मूलभूतत्त्वं रुद्रतत्त्वम्। एकः एव रुद्रो द्वितीयो नास्ति। यथा उक्तं श्रुतौ - "एको हि रुद्रो न द्वितीयाय तस्थु।"[40]

## संदर्भ सूची


1. ऋक्संहितायाः १.४३.१ इति मन्त्रस्य सायणभाष्यम्
2. अथर्ववेदस्य ७.९१.१ इति मन्त्रस्य सायणभाष्यम्
3. ऋक्संहितायाः १.११४.१ इति मन्त्रस्य सायणभाष्यम्
4. ऋक्संहितायाः १.११४.१ इति मन्त्रस्य सायणभाष्यम्
5. ऋक्संहितायाः १.११४.१ इति मन्त्रस्य सायणभाष्यम्
6. ऋक्संहितायाः १.११४.१ इति मन्त्रस्य सायणभाष्यम्
7. शुक्लयजुर्वेदः १६.१९
8. शुक्लयजुर्वेदः १६.३४
9. शुक्लयजुर्वेदः १६.१
10. निरुक्तम् ७.२ ( "अग्निः पृथिवीस्थानः। वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः। सूर्यो द्युस्थानः।")
11. निरुक्तम् ७.२
12. निरुक्तम् १०.१
13. निरुक्तम् १०.१

14. शुक्लयजुर्वेद: १६.६४
15. शुक्लयजुर्वेद: १६.६५
16. शुक्लयजुर्वेद: १६.६६
17. शुक्लयजुर्वेद: १६.५
18. शुक्लयजुर्वेदस्य १६.५ इति मन्त्रस्य भाष्यम्
19. शुक्लयजुर्वेद: १६.३
20. शुक्लयजुर्वेद: १६.११
21. शुक्लयजुर्वेदस्य १६.४७ इति मन्त्रस्य भाष्यम्
22. शुक्लयजुर्वेद: १६.४८
23. शुक्लयजुर्वेद: १६.४९
24. शुक्लयजुर्वेदस्य १६.४९ इति मन्त्रस्य भाष्यम्
25. शुक्लयजुर्वेद: १६.५०
26. शुक्लयजुर्वेद: १६.५१
27. शुक्लयजुर्वेदस्य १६.५१ इति मन्त्रस्य भाष्यम्
28. शुक्लयजुर्वेद: १६.५२
29. शुक्लयजुर्वेद: १६.५३
30. शुक्लयजुर्वेद: १६.६२
31. शुक्लयजुर्वेदस्य १६.६३ इति मन्त्रस्य भाष्यम्
32. शुक्लयजुर्वेद: १६.६४
33. शुक्लयजुर्वेदस्य १६.६४ इति मन्त्रस्य भाष्यम्
34. शुक्लयजुर्वेद: १६.६५
35. शुक्लयजुर्वेद: १६.६६
36. शुक्लयजुर्वेद: ३.५८
37. शुक्लयजुर्वेदस्य ३.५८ इति मन्त्रस्य भाष्यम्
38. शुक्लयजुर्वेद: ३.५९
39. शुक्लयजुर्वेदस्य ३.५९ इति मन्त्रस्य भाष्यम्
40. श्वेताश्वतरोपनिषद् ३.२